॥ पञ्च शान्तिः ॥

| | pañca śāntiḥ | |

ॐ शं नो॑ मि॒त्रः शं वरु॑णः। शं नो॑ भवत्-वर्य॒मा। शं न॒ इन्द्रो॒ बृह॒स्पति॑ः। शं नो॒ विष्णु॑-रुरुक्र॒मः। नमो॒ ब्रह्म॑णे। नम॑स्ते वायो। त्वमे॒व प्र॒त्यक्ष॒ं ब्रह्मा॑सि। त्वामे॒व प्र॒त्यक्ष॒ं ब्रह्म॑ वदिष्यामि। ऋ॒तं व॑दिष्यामि। स॒त्यं व॑दिष्यामि। तन्मा-म॑वतु। तद्व॒क्तार॑-मवतु - अव॑तु॒ माम्। अव॑तु व॒क्तारम्।

ॐ शान्ति॒ श्शान्ति॒ श्शान्ति॑ः ॥

om śaṁ no mitraḥ śaṁ varuṇaḥ | śaṁ no bhavat-varyamā | śaṁ na indro bṛhaspatiḥ | śaṁ no viṣṇu-rurukramaḥ | namo brahmaṇe | namaste vāyo | tvameva pratyakṣaṁ brahmāsi | tvāmeva pratyakṣaṁ brahma vadiṣyāmi | ṛtaṁ vadiṣyāmi | satyaṁ vadiṣyāmi | tanmā-mavatu | tadvaktāra-mavatu - avatu mām | avatu vaktāram |
om śānti śśānti śśāntiḥ | |

ॐ शं नो॑ मि॒त्रः शं वरु॑णः। शं नो॑ भवत्-वर्य॒मा। शं न॒ इन्द्रो॒ बृह॒स्पति॑ः। शं नो॒ विष्णु॑-रुरुक्र॒मः। नमो॒ ब्रह्म॑णे। नम॑स्ते वायो। त्वमे॒व प्र॒त्यक्ष॒ं ब्रह्मा॑सि। त्वामे॒व प्र॒त्यक्ष॒ं ब्रह्मा-वा॑दिषम्। ऋ॒त-म॑वादिषम्। स॒त्य-म॑वादिषम्। तन्मा-मा॑वीत्। तद्व॒क्तार॑-मावीत्। आवी॒न्माम्। आवीद्-व॒क्तारम्।

ॐ शान्ति॒ श्शान्ति॒ श्शान्ति॑ः ॥

om śaṁ no mitraḥ śaṁ varuṇaḥ | śaṁ no bhavat-varyamā | śaṁ na indro bṛhaspatiḥ | śaṁ no viṣṇu-rurukramaḥ | namo brahmaṇe | namaste vāyo | tvameva pratyakṣaṁ

brahmāsi | tvāmeva pratyakṣaṁ brahmā-vādiṣam | ṛta-mavādiṣam | satya-mavādiṣam | tanmā-māvīt | tadvaktāra-māvīt | āvīnmām | āvīd-vaktāram |
om śānti śśānti śśāntiḥ ||

ॐ सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै। तेजस्वि नावधीतमस्तु। मा विद्विषावहै॥ ॐ शान्तिः शान्तिः शान्तिः॥

om saha nāvavatu | saha nau bhunaktu | saha vīryaṁ karavāvahai | tejasvi nāvadhītamastu | mā vidviṣāvahai || om śāntiḥ śāntiḥ śāntiḥ ||

ॐ नमो वाचे या चोदिता या चानुदिता तस्यै वाचे नमो नमो वाचे नमो वाचस्पतये नम ऋषिभ्यो मन्त्रकृद्भ्यो मन्त्र-पतिभ्यो मामा-मृषयो मन्त्र-कृतो मन्त्र-पतयः परादुर्मा ऽहमृषीन्-मन्त्र-कृतोमन्त्र-पतीन्-परादां वैश्वदेवीं वाच-मुद्यासगं् शिवा-मदस्तां जुष्टां देवेभ्यः शर्म मे द्यौः शर्म-पृथिवी शर्म विश्वमिदं जगत् .। शर्म चन्द्रश्च सूर्यश्च शर्म ब्रह्म-प्रजापती। भूतं वदिष्ये भुवनं वदिष्ये तेजो वदिष्ये यशो वदिष्ये तपो वदिष्ये ब्रह्म वदिष्ये सत्यं वदिष्ये तस्मा अहमिद-मुप-स्तरण-मुपस्तृण उपस्तरणं मे प्रजायै पशूनां भूयादुप-स्तरण-महं प्रजायै पशूनां भूयासं प्राणापानौ मृत्योर्-मापातं प्राणापानौ मा मा हासिष्टं मधु मैनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि मधु-मतीं देवेभ्यो वाच-मुद्यासगं् शुश्रू-षेण्यां मनुष्येभ्यस्तं मा देवा अवन्तु शोभायै पितरोऽनुमदन्तु॥
ॐ शान्ति श्शान्ति श्शान्तिः॥
om namo vāce yā coditā yā cānuditā tasyai vāce namo namo vāce namo vācaspataye nama ṛṣibhyo

mantrakṛdbhyo mantra-patibhyo māmā-mṛṣayo mantra-kṛto mantra-patayaḥ parādurmā 'hamṛṣīn-mantra-kṛtomantra-patīn-parādāṁ vaiśvadevīṁ vāca-mudyāsagṁ śivā-madastāṁ juṣṭāṁ devebhyaḥ śarma me dyauḥ śarma-pṛthivī śarma viśvamidaṁ jagat . | śarma candraśca sūryaśca śarma brahma-prajāpatī | bhūtaṁ vadiṣye bhuvanaṁ vadiṣye tejo vadiṣye yaśo vadiṣye tapo vadiṣye brahma vadiṣye satyaṁ vadiṣye tasmā ahamida-mupa-staraṇa-mupastṛṇa upastaraṇaṁ me prajāyai paśūnāṁ bhūyādupa-staraṇa-mahaṁ prajāyai paśūnāṁ bhūyāsaṁ prāṇāpāṇau mṛtyor-māpātaṁ prāṇāpānau mā mā hāsiṣṭaṁ madhu mainiṣye madhu janiṣye madhu vakṣyāmi madhu vadiṣyāmi madhu-matīṁ devebhyo vāca-mudyāsagṁ śuśrū-ṣeṇyāṁ manuṣyebhyastaṁ mā devā avantu śobhāyai pitaro'numadantu ||
om śānti śśānti śśāntiḥ ||

ॐ तच्छं योरा-वृणीमहे। गातुं यज्ञाय। गातुं यज्ञपतये। दैवीस्स्वस्तिरस्तु नः। स्वस्तिर्-मानुषेभ्यः। ऊर्ध्वं जिगातु भेषजम्। शन्नो अस्तु द्विपदे। शं चतुष्पदे।

ॐ शान्ति श्शान्ति श्शान्तिः॥

om tacchaṁ yorā-vṛṇīmahe | gātuṁ yajñāya | gātuṁ yajñapataye | daivīssvastirastu naḥ | svastir-mānuṣebhyaḥ | ūrdhvaṁ jigātu bheṣajam | śanno astu dvipade | śaṁ catuṣpade |
om śānti śśānti śśāntiḥ ||